F.Y.
March 2017

Reg. No. ......................................

Name ..........................................

605

## Part - II

## SANSKRIT

Maximum : 80 Scores

Time : **2½** Hours
Cool off time : **15** Minutes

***General Instructions to Candidates :***

- There is a 'Cool off time' of 15 minutes in addition to the writing time of 2½ hrs.
- You are neither allowed to write your answers nor to discuss anything with others during the 'cool off time'.
- Read the questions carefully before answering.
- All questions are compulsory and only internal choice is allowed.
- When you select a question, all the sub-questions must be answered from the same question itself.
- Electronic devices except nonprogrammable calculators are not allowed in the Examination Hall.

**निर्देशा: –**

**सर्वे** प्रश्ना: समाधेया: ।

प्रश्नान् प्रश्ननिर्देशान् च सावधानतया पठित्वा उत्तरयत ।

प्रश्नानां वाचनाय 15 निमेषा: कल्पिता: ।

**1. क)** काननमध्यस्थित: रत्नाकर: नाम निषाद: सप्तर्षीन् प्रति सक्रोधमवदत् । संभाषणांशं संभाव्य लिखत ।

रत्नाकर: – तिष्ठत तत्रैव तिष्ठत । भवदीयं सर्वं प्रयच्छत ।

वसिष्ठ: – ..................?

रत्नाकर: – रत्नाकरो नाम निषाद: ।

वसिष्ठ: – केवलं कमण्डलु: ............... ।

रत्नाकर: – कमण्डलुश्चेत् कमण्डलु: । दातव्यं तत् ।

वसिष्ठ: – एतादृशं पापकर्मं किमर्थं करोति?

रत्नाकर: – ................. । **(6)**

**ख)** पदच्छेदं कुरुत । उदाः तेनैव = तेन + एव ।

स्वेनैव = ....... + ....... । **(1)**

**ग)** रामायणस्य कर्ता कः ?

(वसिष्ठः, वाल्मीकिः, भासः) **(1)**

**2.** श्लोकस्यास्य गद्यक्रमं पूरयत ।

नहि देहिनि शोभनं भवे–

च्चरितार्थे सति जीवितं पुनः ।

सुतरां नटने समापिते

स च रङ्गाद्विरमेत् कुशीलवः ।।

देहिनि चरितार्थे सति ............ जीवितं नहि ........ भवेत् ।

नटने सुतरां ........... सति सः ........... च रङ्गाद्विरमेत् । **(4)**

**3.** इष्टतमः श्लोकः क इति सकारणं लिखत ।

क) इयमस्तु नतिर्ममान्तिमा

दिनसाम्राज्यपते! दिवस्पते!

कनकांशुशरौघधारिणे

भवते दुष्प्रसहप्रदीप्तये ।।

ख) विशिखा! निशिता विरम्यतां

क्षतमेयात् स्तिमितं न मे मनः ।

पूरतो भ्रम लोकचक्र! मां

त्यज सीतामिह तां हतामहो ।।

ग) सुसिताम्बर! वन्द्य! वृद्ध! भो!

बिसिनितन्तुमरीचिकैशिक! ।

लसितस्मित! चारुचन्द्रिका-

भसितस्नात! मृगाङ्क! ते नमः ।। **(7)**

**4.** माहेश्वरसूत्राणि क्रमीकुरुत ।

एओ ङ्, अ इ उ ण्, ऋ लृ क्, ऐ औ च् । **(4)**

**5.** **क)** आयुर्वेदरीतिमवलंब्य स्वकीयां दिनचर्यां लिखत ।

(**सूचिकाः** – प्रातः पञ्चवादने उत्तिष्ठति, स्नानं करोति, ईश्वर स्तुतिं करोति, अल्पाहारं करोति, पठनं करोति, क्रीडति, रात्रौ निद्रां करोति ।) **(7)**

ख) अहं प्रातः ………… (5.15) वादने योगासनं करोमि । **(1)**

**6.** शत्रुसंहारं अकृत्वा, समस्तं राजैश्वर्यं अप्राप्य

केवलं राजशब्देन न राजा भवितुं अर्हति ।

**क)** खण्डिकां पठित्वा क्त्वान्त-ल्यवन्त-तुमुन्नन्तपदानि चित्वा लिखत ।

i) क्त्वान्तपदम् - ................. ।

ii) ल्यबन्तपदम् - ................. ।

iii) तुमुन्नन्तपदम् - ................. ।  **(3)**

**ख)** एतदाशययुक्तं श्लोकं चित्वा लिखत ।

i) अकृत्वा शत्रुसंहारम्

अगत्वाखिलभूश्रियम् ।

राजाहमिति शब्दान्नो

राजा भवितुमर्हति ।

ii) मस्तकन्यस्तभारादे -

र्दु:खमन्यैर्निवार्यते ।

क्षुधादिकृतदु:खं तु

विना स्वेन न केनचित् ।।  **(2)**

**7.** द्वौ रूपकसङ्केतौ अधिकृत्य ससन्दर्भं लिखत ।

क) आत्मगतम् ख) नेपथ्यम् ग) प्रकाशम् **(8)**

**8.** **क)** उचितं पदमुपयुज्य पूरयत ।

अथ ............ उवाच ........... परमार्थत: हरम् न वेत्सि ........... ।

यत: माम् ............... आत्थ ।

(त्वं, एनं, एवं, नूनं) **(4)**

**ख)** उदाहरणानुसारं वाक्यं परिवर्त्य लिखत ।

उदा : ईश्वरं भजतु । ईश्वरं भजति ।

शास्त्रं पठतु । .............. ।

मंङ्गलं भवतु । .............. । **(2)**

**9.** खण्डिकां पठित्वा अध: प्रदत्तानां प्रश्नानाम् उत्तराणि लिखत ।

अथ <u>पितृवनं</u> परित: अवलोक्य तत्रैकं त्वरितं गच्छन्तम् <u>उष्ट्रं</u> दृष्ट्वा <u>विस्मिता:</u> अभवन् ।

तृतीयस्तु ग्रन्थं परामृश्य ''धर्मस्य <u>त्वरिता</u> गति:'', इति पठन् ।

(रासभं, अद्भुता:, श्मशानं, शीघ्रं)

**प्रश्ना:**

क) खण्डिकायां रेखाङ्कितपदस्य स्थाने कोष्टकात् समानार्थपदमुपयुज्य लिखत । **(4)**

ख) धर्मस्य का गति: ? **(2)**

ग) पदच्छेदं कुरुत । उदा– तृतीय: + तु = तृतीयस्तु ।
संस्कृत: + तु = ................ । **(1)**

**10.** भाषान्तरीकरणं कुरुत ।

''मम कर्मधीरा: युवका: यूयं सर्वे महान्ति कार्याणि कर्तुमागता: इति विश्वास: युष्मासु अवश्यं भवेत् । शुनकस्य भषणं श्रुत्वा मा भैष्ट । गगने विद्यमानेन विद्युत: प्रभावेनापि चकिता: न भवेत'' । **(6)**

**11.** उत्प्रेक्षालङ्कारं सलक्षणं निरूपयत । **(5)**

**अथवा**

उपमालङ्कारं सलक्षणं निरूपयत । **(5)**

**12.** श्लोकं पठित्वा प्रश्नानां उत्तराणि लिखत ।

क) साहित्यसङ्गीतकलाविहीन:
साक्षात्पशु: पुच्छविषाणहीन: ।
तृणं नखादन्नपि जीवमान –
स्तद्भागधेयं परमं पशूनाम् ।।

ख) प्रारभ्यते न खलु विघ्नभयेन नीचै:
प्रारभ्य विघ्नविहता विरमन्ति मध्या: ।
विघ्नै: पुन: पुनरपि प्रतिहन्यमाना:
प्रारब्धमुत्तमजना न परित्यजन्ति ।।

ग) धर्मो हि यत्नै: पुरुषेण साध्यो
भुजङ्गजिह्वाचपला नृपश्रिय: ।
तस्मात् प्रजापालनमात्रबुद्ध्या
हतेषु देहेषु गुणा: धरन्ते ।।

**प्रश्नाः**

i) भिन्नवृत्तयुक्तं श्लोकम् उद्धृत्य लिखत । **(3)**

ii) उद्धृतस्य श्लोकस्य वृत्तं सलक्षणं लिखत । **(3)**

iii) 'नमति' इति पदं कस्मिन् गणे अन्तर्भवति ? (मगणः, नगणः, भगणः) **(1)**

**13.** यथोचितं योजयत ।

| **क विभागः** | **ख विभागः** |
|---|---|
| क) एन्. गोपालपिल्लै | 1) कर्णभारम् |
| ख) पाणिनिः | 2) सीताविचारलहरी |
| ग) भासः | 3) अष्टाध्यायी |
| घ) शङ्कराचार्यः | 4) पन्चतन्त्रं |
| ङ) विष्णुशर्मः | 5) विवेकचूडामणिः । |

**(5)**